सूर्यघातकम्

~~[illegible]~~ २३२



७१ सूर्यशतक १००

सूर्यशतक

पाठवे यनाथस्य पुस्तकं

मोताराम कृदन पत्र १५

नं० २३२५
सूर्यशतक
१६ पत्राणी
काव्य
कर्ता-
मयूर कवि:

श्रीगणेशाय नमः॥ सवित्रे नमः॥ जंभारातीभकुंभोद्भवमिव दधतः सांद्रसिंदूर
रेणुं रक्ताः सिक्ता इवौघैरुदयगिरितटीधातुधाराद्रवस्य॥ आयांत्या तुल्यका
लं कमलवनरुचेवारुणा वो विभूत्यै भूयासुर्भासयंतो भुवनमभिनवा भानवो
भानवीयाः॥१॥ भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनां लक्ष्मी
माक्रष्टुकामा इव कमलवनोद्घाटनं कुर्वते ये॥ कालाकारांधकाराननप
तितजगत्साध्वसध्वंसकल्याः कल्याणं वः क्रियासुः किसलयरुचयस्ते करा
भास्करस्य॥२॥ गर्भेष्वंभोरुहाणां शिखरिषु च शिताग्रेषु तुल्यं पतंतः प्रारं
भे वासरस्य व्युपरतिसमये चैकरूपास्तथैव॥ निष्पर्यायं पतंतस्त्रिभुवन १
भवनप्रांगणे पांतु युष्मानूष्माणं संततार्ध्वश्रमजमिव भृशं बिभ्रतो ब्रध्नपादाः॥३॥

न्यक्कुर्वन्नोषधीशंमुषितरुचिशुचेवौषधीःप्रोषिताभाभास्वद्ग्रावोद्गतेनप्रथममिव
कृताभ्युद्गतिःपावकेन॥पक्षच्छेदव्रणासृक्स्रुतइवदृषदोदर्शयन्प्रातरद्रेराता
म्रस्तीव्रभानोरनभिमतनुदेस्ताद्गभस्त्युद्गमोवः॥४॥प्रभ्रश्यदुत्तरीयत्विषित
मसिसमुद्वीक्ष्यवीतावृतीन्प्राग्जन्तूंस्तन्तून्यथायानतनुवितनुतेतिग्मरोचिर्मरी
चीन्॥तेसान्द्रीभूयसद्यःक्रमविशददशाशादशालीविशालंशश्वत्संपादयं
तोंबरममलमलंमंगलंवोदिशन्तु॥५॥शीर्णघ्राणांघ्रिपाणीन्व्रणिभिरपघनै
र्घर्घराव्यक्तघोषान्दीर्घाघ्रातानघौघैःपुनरपिघटयत्येकउल्लाघयन्यः॥घर्मां
शोस्तस्यवोन्तर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेर्दत्तार्घाःसिद्धसंघैर्विदधतु
घृणयःशीघ्रमंहोविघातं॥६॥बिभ्राणावामनत्वंप्रथमंथतथैवांशवःप्रां
म

रायेवः कांताकाशांततालास्लरनुदशा दिशाः पूरयंतस्ततोऽपि ॥ ध्वांतादाच्छि
द्यदेवद्विषइवबलितो विश्वमाश्वस्य शुचानोकंछुरोल्युष्णायदेका पद्मसितहर
योशाहिदश्याहरंतु ॥७॥ उद्गाढेनारुणिम्ना विदधति बहुलं येऽरुणस्याल
णत्वं मूर्धोद्धूतौ खलीनक्षतरुधिररुचो ये रथाश्वाननेषु ॥ शैलानां शे
खरत्वं श्रितशिखरशिखास्तन्वते यद्विद्रोलुऽंखवंतः स्वैरस्वरांशोः ख
चितदिनमुखाश्लेमयूखाः सुखं वः ॥८॥ दत्तानंदाः प्रजानां समुचितसमया
कृष्टसृष्टैः पयोभिः पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यह्निसंहारभाजः ॥
दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो गावो वः पावनानां
परमपरिमितां प्रीतिमुत्पादयंतु ॥९॥ बंधध्वंसैकहेतुं शिरसि नतिरसा

बद्धसंध्यांजलीनांलोकानांयेप्रबोधंविदधतिविपुलांभोजखंडाश्रयेचाति
युष्माकंस्वचित्तप्रथमरथुतरप्रार्थनाकल्पवृक्षाः कल्मांनोकेयं दिनकर निर्वि
किरणाः केतवः कल्मषस्य॥१०॥धारारायोधनायापदिसपदिकरालंबभू
ताःप्रतापेनत्वालोकेकदीपास्त्रिदिवपतिपुरःप्रस्थितोवीथ्यएव॥निर्वाणोद्यो
गियोगिप्रगमनिजतनुद्वारिवेत्रायमाणास्त्रायंतांनोप्रभानोदिवसमुखसु
खारश्मयःकल्मषात्॥११॥प्राचिप्रागाचरंत्योनतिचिरमचलेचारुचूडामणि
त्वंमुंचंत्योरोचनांनुप्रचुरमिवदिशामुच्चकैश्चर्चनाय॥चाद्ट्रकैश्चक्रनाम्नामु
चिरमविचलेलोचनेरच्यमानाश्चेष्टंताचिंतितानामुचितमचरमाश्चंडरोची
रुचोवः॥१२॥एकंज्योतिर्दृशौद्वेत्रिजगतिगदितान्यब्जजास्यैश्चतुर्भिर्भूतानां

3

तु

पंचमं यान्यलमलघुनथाषट्सुनानाविधानि॥युष्माकं तानि सप्तत्रिदशामुनि
नुतान्यष्टदिग्भाजि भानोर्यांति श्राद्धेनवलं दशादह्निवंदीधितीनांशतानि॥१३॥
आवृत्तिर्भ्रांतविश्वाः श्रममिवदधतः शोषिणः स्वोष्मणेवग्रीष्मेदावाग्नितप्ता
इवरसमसकृद्येधरित्र्याधयंति॥ति श्रावृष्यास्तपानातिशयरुजइवोद्धांततोया
हिमर्तौ मार्तंडस्यात्रचंडाश्चिरमशुभमिदेभीषवोवोभवंतु॥१४॥तन्वानादिग्व
धूनां सममधिकमधराली करम्यामवस्यामारूढश्रोढिलेशोल्ललितकपिलि
मालंकृतिः केवलेव॥उज्जंभांभोजनेत्रद्युतिनिदिनमुखेकिंचिदुन्निद्रमाना
श्मश्रुश्रेणीवभासां दिशतु दशशतानीशर्मधर्मत्विषोवः॥१५॥मौलीदोमेषमौ
धौ द्युतिमिलितरुषभोंकेनयः शांकिनेवप्रत्यग्रोद्वादितोभोरुहकुहरगुहासुस्थि

2

नेनेवधात्रा॥ क्रमेण ध्वांतक्रमस्वतनुपरिभवत्रस्तुनेव स्तुतो लं त्राणाय स्तान्न
नीयान्नपि तिमिररिपोः सा त्विषामुष्मा वः॥१६॥ विस्तीर्णं व्योम दीर्घाः सपदि द
शदिशो व्यस्तवेलांभसोऽब्धीन् कुर्वद् दृश्यं नानानगरनगनगाभोगवत्पृथ्वीचपृथ्वीं॥
पश्चिन्मुग्धास्वतेयैरुषसि जगदपि ध्वंसयित्वा तमिस्रामुस्रा विस्रंसयंतु द्रुतम
नभिमतं ते सहस्रं त्विषां वः॥१७॥ अस्तव्यस्तत्वशून्यो निजरुचिरनिशानश्वरः
कर्तुमीशो विश्वं वेश्मेव दीपः प्रतिहततिमिरं यः प्रदेशस्थितोपि॥ दिक्कालापे
क्षयासौ त्रिभुवनमटतस्तिग्मभानोर्नवाख्यां यातः शातक्रतव्यां दिशि दिश
तु शिवं सोऽर्चिषामाकरो वः॥१८॥ मागान्म्लानिं मृणालीमृदुरिति दययेवाप्र
विष्टोऽहिलोकं लोकालोकस्य पार्श्वं प्रतपति न परं यस्तदाख्यार्थमेव॥ ऊर्ध्वं ब्र

स्तां उरवंउस्फुरन्नभयपरित्यक्तहृदये घोरेश्रुसीम्नि स्वेच्छावश्यपावकात्राणावधिरवतु
स वस्तापनोरोविरोधः ॥१९॥ अन्तर्यामः कालएकोनभवतिभुवनांतोपिवीतांध
कारः सद्यः प्रालेयपादोनविलयमचलश्चांद्रमाअप्युपैति ॥ वंधः सिद्धांजलीनां
नहिकुमुदवनस्यापियत्रोज्जिहानेनत्स्यात्ःप्रेक्षणीयंदिनानुदिनपलेर्धामका
माधिकंवः ॥२०॥ यत्कांतिंपंकजानांनहरतिकुरुतेप्रस्तुताधिक्यरम्यांनोधत्ते
तारकाभांतिरयतिनितरामाश्रुयन्नित्यमेव ॥ कर्तुंनालंनिमेषंदिवसमपिप
रंयन्नदेकेत्रिलोक्याश्चक्षुः सामान्यचक्षुर्विसदृशमघभिद्भास्वतस्तान्महोवः ॥२१॥
क्ष्मां क्षेपीयः क्षपांभः क्षिप्रारतरतलस्पर्शात्तप्ताहृतेवद्रागागच्छन्नेतुमाः स्थाद्विरद
करसरः पुष्करापीववोधं ॥ प्रातः प्रोल्लंघ्यविष्णोः पदमपिघृणयेवातिवेगा ४

हृदीयस्सुहृन्मद्योतमाना दहन्तु दिनपतेर्दुर्निमित्तं द्युतिर्वः ॥२२॥ नो कल्पापाय
वायोरदयरयदलत्क्ष्माधरस्यापि गम्या गाढोद्गीर्णोज्ज्वलश्रीरहनि न रहिता
नो तमःकज्जलेन ॥ प्राप्तोत्पत्तिः पतंगान्न पुनरुपगता मोषमुष्णत्विषो वो वर्तिः
सैवान्यरूपा सुखयतु निखिलद्वीपदीपस्य दीप्तिः ॥२३॥ निःशेषाशावपूरप्र
वणगुरुगुणश्लाघनीयस्वरूपा पर्याप्तिं नोदयादौ दिनगमसमये पल्लवेष्वु
न्नतैव ॥ अत्यंतं यानभिज्ञा क्षणमपि तमसा साकमेकत्र वस्तुं ब्रध्नस्येद्धा रु
चिर्वो रुचिरिव रुचितस्याप्तये वस्तुनोस्तु ॥२४॥ विभ्राणः शक्तिमाशु प्रशमि
तबलवत्तारकौर्जित्यगुर्वीं कुर्वाणो लीलयाधः शिखिनमपि लसच्चन्द्रका
न्तावभासं ॥ आदध्यादन्धकारे रतिमतिशयिनीमावहन्वीक्षणानां बालोल

श्मीमपारामपर इव गुहोऽह्नःपतेरातपो वः ॥२५॥ ज्योत्स्नांशाकर्षपांडुद्युतितिमिर
मषीशेषकल्माषमीषज्जृंभोद्भूतेन पिंगं सरसिजरजसा संध्यया शोणशोचिः ॥
प्रातः प्रारंभकाले सकलमपि जगच्चक्षुरुन्मीलयंती कांतिस्तीक्ष्णत्विषोऽक्ष्णां
मुदमुपनयतात्तूलिकेवातुलां वः ॥२६॥ आयांती किं सुमेरोः सरणिररुणि
ता पाद्मरागैः परागैराहोस्वित्त्वस्य माहारजनविरचिता वैजयंती रथस्य ॥
मांजिष्ठी पृष्ठवाहावलिविधनशिरश्चामराली नु लोकैरालोक्याशंकितेवं स
वितुरघनुदस्तात्प्रभातप्रभा वः ॥२७॥ ध्वांतध्वंसं विधत्ते न तपति रुचिमान्ना
तिरूपं व्यनक्ति न्यक्त्वं नीतापि नक्तं न वितरतितरां तावदिनस्त्विषं वः ॥ सधा
तर्मा विरंसीदमकलपटिमापूरयन्नुष्णदाशामाशाकाशावकाशावतरण ५

तरुणप्रक्रमोर्कप्रचारः॥२८॥तीव्रं निर्वाणहेतुर्यदपि च विपुलं यत्प्रकर्षेण चाणु
प्रत्यक्षं यत्परोक्षं यदिह यदपरं नश्वरं शाश्वतं च॥यत्सर्वस्य प्रसिद्धं जगति क
तिपये योगिनो यद्विदंति ज्योतिस्तद्द्विप्रकारं सवितुरवतु वो बाह्यमाभ्यंतरं च॥२९॥
रत्नानां मंडनाय प्रभवति नियतोद्देशलब्धावकाशं वह्नेर्दार्वादि दग्धुं निजज
डिमतथा कर्तुमानंदमिंदोः॥यत्तु त्रैलोक्यभूषाविधिरघदहनं ह्लादि वृष्ट्या
द्रुतद्वो वाकृत्स्नोत्पादि घकार्याधिकतरमवतादेकमेवार्कतेजः॥३०॥मीलच्च
क्षुर्विजिह्मश्रुति जडरसनं विघ्नितघ्राणवृत्ति स्वव्यापाराक्षमत्वक्परिमुषि
तमनः श्वासमात्रावशेषं॥विस्रस्तांगं पतित्वा स्वपदपहरतादश्रियं वोर्कज
न्मा कालव्यालावलीढं जगदगद इवोत्थापयन्प्राक्प्रतापः॥३१॥निःशेषं

नेत्रांभः प्रसभमपनुदन्नश्रुलेशानुकारिस्तोकस्तोकानुकौश्रिं पनीतारुणरुचिर
6 चिरादस्तदोषानुषंगः।। दाता दृष्टिं प्रसन्नां त्रिभुवननयनस्याशु युष्मद्विरुद्धं ब
ध्याद्ध्मस्यासिद्धांजनविधिरपरः प्राक्तनोर्चिःप्रचारः।। २२।। भक्त्वाजंभस्य भेत्तुः
प्रसभमिभकुम्भपरिभवारंभमूर्ध्नः शुभ्रभानोर्विभ्राणा बभ्रुभावं प्रसभमभिनवांभो
जजं भाप्रगल्भा।। भूषाभूयिष्ठशोभा त्रिभुवनभवनस्यास्तु वैभाकरी प्राग्विभ्रां
तिभ्राजमाना विभवतु विभवोद्भूतये सा विभा वः।। २३।। संसिक्तः सिक्तमूला
दभिनवभुवनोद्यानकौतूहलिन्या यामिन्या कन्ययेवामृतकरकलशावर्जि
तेनामृतेन।। अर्कालोकः क्रियाद्वो मुदमुदयशिरःस्थकस्थचालालवालादुद्यन्बा
लप्रवालप्रतिमरुचिरहः पादपप्राक्प्ररोहः।। २४।। भिन्नं भासारुणस्य क ६

चिरभिनवयाविद्रुमाण्या।लिषेवल्गन्नक्षत्ररत्नद्युतिनिकरकरालांतराले
क्वचिच्चा।नांतर्निःशेषकृष्णश्रियमुदधिमिव ध्वांतराशिं पिबंत्या दोर्वः पूर्वो
व्यपूर्वोग्निरिव भवदघप्लुष्टये काविभासः॥२५॥ गंधर्वैर्गद्यपद्यव्यतिकरितनव
चोहृद्यमातोद्यवाद्यैराध्येयोनारदाद्यैर्मुनिभिरभिनुतो वीतवैद्यैर्विभिद्य॥आ
साद्यापद्यते यं पुनरपि च जगद्यौवनं सद्य उद्यन्नुद्योतो द्योतितद्यौर्घनुदिवस
कृतोसाववद्यान्निवोद्य॥२६॥ आवानैश्चंद्रकांतैश्च्युततिमिरतया तानवान्नार
काणामेणां काले कलोपाद्रुपहतमहसामोषधीनां लयेन॥ आसन्नप्रेक्ष्यमा
णाक्षणमुदयतटांतार्हितस्याहिमांशोराभाभाभानिकीवोघनुननुन्नितूरालाव
दाविर्भवंती॥२७॥ मानोमानोदयेनारुणितदलपुनर्यौवनानां वनानां माली

मालीढपूर्वापरिहृतकुहरोपान्तनिम्नानतनिम्ना॥ भावो भावो पन्नोतिं दिव्या नुदिन
पते भर्तिसमानासमानाराजीराजीवरेणोः समसमसमयमुदेतीव यस्या वयस्या॥ ३८॥
उज्जृम्भाम्भोरुहाणां प्रभवति पयसां या श्रिये नोष्मता ये पुष्यात्याlोकमात्रं
न तु दिव्यानि हृत्वा द्वन्द्वप्रमानाभिधातं॥ पूर्वाद्रिरेवपूर्वं दिवमनु च पुनः पावनी
दिङ्मुखानां एनांस्येनी विभासो नुद नुनुन्नपरैकास्पदं धाकृतनीवः॥ ३९॥
वाचां वाचस्पतेरप्यचलभिदुचिताचार्यकाणां प्रपञ्चैर्वैरिञ्चानां तथोच्चारित
रुचिरऋचां चाननानां चतुर्णां॥ उच्चैस्तां चामुवाच्यच्युतमशुचिचरितं यस्य नो
च्चैर्विविच्यप्राञ्चं वर्चश्चकासञ्चिरमुपचिनुतात्तस्य चण्डार्चिषो वः॥ ४०॥
मूर्ध्न्यद्रेर्धातुरागस्तरुषु किसलयो विद्रुमौघः समुद्रे दिङ्मातङ्गोत्तमाङ्गे

घ्रमिनवृनिहितः सोऽस्मिंहररेणुः ॥ सौम्नि व्योम्न भ्रहेमन्तःसुरत्रिरवरिभुवो जायते यः प्रका
शः श्रोणिम्नासैरवरांश्रोरुषसि दिश्राद्युवः श्रामशोभैकदेशः ॥ ७१ ॥ अस्माड्डीश्रो नमां
गश्चितश्चारिन्नि नमः कालकूटे निपीते याति व्याप्तिं पुरस्तादरुणकिसलये भृत्सु पुष्पः पारि
जाते ॥ उद्यदर्की रक्तपीतांबररुचिरतरा द्वीक्षितातीक्ष्णभानोर्लक्ष्मीर्लक्ष्मीरिवास्तास्फु
टकमलपुटोपाश्रयाश्रेयसे वः ॥ ७२ ॥ नोदन्वान्जन्मभूमिर्न तदुदरभुवो बांधवाः कौ
स्तुभाद्या यस्याः पद्मं न पाणौ न च नरकरिपूरःस्थली वासवेश्म । तेजोरूपापरैव त्रिभु
वनतले घादधाना व्यवस्थां सा श्रीः श्रेयांसि दिश्याद्विरश्रिरमहसो मंडलश्रो
द्गता वः ॥ ७३ ॥ रक्षंत्वक्षुण्णहेमोपलपटलमलं लाघवादुत्पतंतः पातंगाः पुंगवाज्ञा
जितपवनजवा वाजिनस्ते जगंति । येषां वीतान्यचिह्नोन्नयमपि वहतां मार्गमाख्या

तिमेरवुघन्नुद्दामरीसिर्धुमणिमणिस्त्रील्वेदिकाजानवेदाः॥४४॥ स्तुष्टाः पृष्ठंशुपाते
रतिनिकटत्तयादन्तदाहातिरेकैरेकाहाक्रांतकस्त्रत्रिदिवपथपृथुश्वाससशोषाः श्र
मेण॥ तीव्रोदन्यास्वरंतामहितविहत्तयेससयः समस्तसेरभ्याशाकाश्शागंगाजल
सरलगलावर्जितायाननावः॥४५॥ मत्वान्यान्यार्भतोभ्वानस्फटिकतटहषदृष्ट
देहाद्वंतीव्यस्तहन्यस्तदैहि संध्येयमितिमृडुपदापद्मरागोपलेषु॥ सादृत्वपारत्य
मूर्तिर्मरकतकूटकेच्छिष्टसूतासुमेरोर्मूर्द्धन्याहन्निलच्छध्रुवगतिरवृताद्ध्ववाहा
वल्लिर्वः॥४६॥ हल्लालोलंवहन्तीविषधरदमनस्यायजेनावेक्रष्टास्ववाहिन्याः सुहृरं
जनितनिजजवास्यंदनस्यस्यंदन॥ निर्वीजंतायमानेहृष्टितिमनिनिजेस्फीतफेन
स्मितश्रीः रम्ग्रेयांस्यपश्चपंक्तिः शमयतुयमुनेवापरानापनीवः॥४७॥ मार्गेपांते ८

सुमेरोर्भुर्वन्तिहुतनतोनाकधाम्नांनिकायेवीक्ष्यव्रीडावतीनांप्रतिकृहरमुखंकिं
नरीणांमुखानि॥स्फूतेस्त्यत्स्वपीषज्जउगलितवहतांकंधराधैर्यलङ्घिवाहानां
व्यस्ताद्दुःसममसमहरेर्हेषितंकल्मषाणि॥४८॥धुन्वंतोनीरदालीर्निजरु
चिहरिताःपार्श्वयोःपक्षतुल्यास्तालूनानैःखलीनैःखचितमुखरुचश्च्योत
तालोहितेन॥उग्रायेवज्रजन्मोवियतिगतिवन्नगदर्कवाहाःक्रियासुःक्षेमंहेमा
द्रिहृद्ग्रुमशिखरशिरःश्रेणिचारखातुकाव॥४९॥प्रातःशैलाग्रंगेरज
निजवनिकापायसंलस्यलक्ष्मीर्निक्षिप्याहर्वपुष्पांजलिमुडुनिकरंसूत्रधा
रायमाणः॥यामेष्वंकेष्विवाह्नःकृतरुचिषुचतुर्ष्वेवजातप्रतिष्ठामव्यात्प्रस्ता
वयन्वोजगदटनमहानाटिकांसूर्यसूतः॥५०॥आक्रान्त्यावाह्यमानंपश्चिमि

१ वहीरणावाहकोग्न्योहरीणांश्राम्यंतंपक्षपातान्जगतिसमरुचिःसर्वकर्मैकसाक्षी॥
शत्रुंनेत्रश्रुतीनामवजयतिवयोऽपुष्टभावेसमेपिस्वेम्नाधाम्नांनिधेर्यःसभेद द
घनुदेनूतनःस्तादनूरुः॥५१॥दत्त्वार्घंदूरनम्रैर्वियतिविनयतोवीक्षितःसिद्ध
संघैःसानाथ्यंसारथिर्वःसदन्यान्यालरुचेःसातिरेकंकरोतु॥आपीयप्रातरेव
प्रततहिमपयःस्यंदिनीरिंदुभासोयःकाष्ठादीपनोग्रेजडितइवभृशंभासवेतत्पृष्ठ
तोर्कें॥५२॥मुंचन्नश्मीन्निनादोदिनगमसमयेसंहरंश्चास्वतंत्रस्तोत्रप्रख्यात
वीर्योविरलहरिपदाक्रांतिबद्धाभियोगः॥कालोत्कर्षाल्लघुत्वंप्रसभमधिपतो
योजयन्योद्विजानांसेवाश्रीतेनएष्मास्वममइवलतनस्त्रायतांसोऽरुणोवः॥५३॥
त्रातःश्यामालतायाःपरशुरिवतमोरण्यवह्नेरिवार्चिःप्राच्येवाग्रेगृहीतुं ९

ग्रहकुमुदवनंप्रागुदस्ताग्रहस्तः॥ऐक्यंबिभ्रंदनुभुज्भोरवधिरिवविधातेवविश्वंप्रबोधंवाहा
नांवोविनेताव्यपनयतुविपन्नामधामाधिपस्य॥५४॥पौरस्त्यस्तोयदर्तोःपवनइवपतन्
पावकस्येवधूमोविश्वस्येवादिसर्गःप्रणवइवपरंपावनोवेदराशेः॥संध्यानृत्योत्सवे
च्छोरिवमदनरिपोर्नंदिनोदीन्निनादःसौरस्याग्रेसुखंवोवितरतुविनतानंदनःस्यंदन
स्य॥५५॥पर्याप्तंतप्तचामीकरकटकतटेश्लिष्टशीतेतरांशावासीदस्यंदनाश्वानुकृ
तमरकतेपाद्मरागायमाणः॥यःसोत्कर्षांविभूषांकुरुतइवकुलक्ष्माभृदीशस्यमेरो
रेनांस्यक्ष्णायइ्रंशामयतुसगुरुःकाश्यपेयद्विषोवः॥५६॥नीलाश्वान्सप्तकस्याइवनिय
मवतांवेत्रकल्पप्रतोदस्तूर्णंध्वांतस्यराशौवितरजनइवोन्मार्जितेदूरभाजि॥पूर्वप्र
स्थोरथस्याक्षितिभृदधिपतीन्दर्शयंस्त्यायतोवस्त्रोलोक्यस्यानदानोद्यतदिवसपतेः

श्राकल्प्रतीहारपालः ॥५७॥ वह्निर्जातं विकाशी क्षणकमलवनं भास्वतो भासिवक्रे नातं
१० नत्वाम्भःपार्श्वेनयममहिषं राक्षसाधीशितास्थ ॥ सप्ती नृसिंचप्रचेतः पवनभजज
वं वित्तपा विद्दितरत्त्वं वंदेन्द्रावें तिजल्पन्नति द्वित्रामधिपान्पातु हंसोग्रणीर्वः ॥५८॥
पान्थानाशान्तपालाद्दरुणवरुणतो माथहीः प्रग्रहार्थं तत्स्माक्रैस्मच केजहिहि नहि स्प ४
रथो याति मैनैकचक्रः ॥ यो कुंथुर्णं किमुच्चैः श्रव समभिक्रषस्य ह्रमं ह्रच्चरातोस्यका
न्यापेक्ष विश्वाप्रक्रुतिरितिरथिः शास्त्रियं सो वनाद्रूः ॥५९॥ नो मूर्छाछिन्नवांछः श्रमवि
वत्राव पुनैर्वनाप्यास्यशोषी पांथः पथ्येतराणि क्षपयतु भवतां भास्वतोग्रे सरःस ॥ यः
संश्रित्य त्रिलोकीमटति पटुतरैस्ताप्यमानो मयूखैर्वैरा शादारामलेखामिव हरितमणि
श्यामलामम्बपंक्तिम् ॥६०॥ सीदन्तों तर्निमज्जज्जडखुरमुखलाः सेकतेनाकनद्याः १०

स्कंदंतः कंदरालीः कनककिखरिणो मेखलासु स्खलंतः ॥ हूंहूर्वाछलोकामरकलट
षदिस्याकवोपन्नयाताः पूष्णोश्वाः परयंसोश्लदवतुजवनैरुकृतेनाग्रगोवः ॥६१॥
पीनोरुप्रेरितास्वैः खुरमुरवरपुटैरायस्थितैः प्रातरह्नावादीर्घांगेरुदस्तोहरिमिरप
गतासंगतिः शादृच्चक्रः ॥ उन्नानान्नरुमूर्द्धावननिहठभवाह्निपातीपृश्रणामः प्रोक्ष
श्रेयोविधत्तांसवितुरवनरव्योमवीथीरथोवः ॥६२॥ ध्वांतौघध्वंसदीक्षाविधिषु
रुवहताशाकसहस्रंकराणां अर्यम्णायोगरिष्णापदमतुलमुपानीयताध्यासने
ना ॥ सम्यक्तानांनितांतभरमिवमरुतामस्तमाप्तांविसोढुंस्कंधात्स्कंधंव्रजन्त्योरु
जिनविजितयेभास्वतःस्यंदनोत्थाः ॥६३॥ योक्षीभूतानुगस्यग्रसितुमिवपुरार
दरयत्कान्दधानोद्धाव्यस्तोघुवाहावलिविहितनहहल्पक्षविक्षेपशोभः ॥ साविनः

स्यंदनो नो निरतित्रायरयप्रीणितानूरुचेताः क्षेपीयो वो गरुत्मानिव हरतु हरीछाविधे
यप्रचारः॥६४॥धूर्ध्वस्ताग्र्यग्रहाणि ध्वजपटपवनांदोलितेंदूनि दूरं राहौ ग्रासाभि
भिलाषादनुसरति पुनर्दत्तचक्रव्यथानि॥यातायात्वा सहेला धुतविबुधधुनीनि
र्झरांभांसि भंग्येयासुर्वो दवीयो दिवि दिवसपतेः स्यंदनप्रस्थितानि॥६५॥उत्कीर्ण
स्वर्णरेणुद्रुतखुरदलिता पार्श्वयोः शश्वदश्वैरस्यांतश्रांतचक्रक्रममनिखिलमिलन्ने
मिनिम्ना भरेण॥मेरोर्मूर्ध्न्यर्घघोषो विघटयतु रवेरेव वीथी रथस्य स्वोष्मो दक्कांबुरि
रूपप्रकटितपुलिनोद्भूसरा स्वर्धुनीव॥६६॥अक्षे रक्षां निबध्य प्रतिसरवलयो योजि
यं त्योपुगाग्यं धूःस्तंभे दत्तधूपाः प्रहितसुमनसो गोचरे रूवरस्य॥नचर्चाभ्यंत्रे ददन्यो २१
मलयजपयसा सिद्धबध्वस्त्रिसंध्यं वंदंते यं द्युमार्गे समनुददतुउदितान्यंशुमत्स्यंदनो वः॥६७॥

नंतुंनाकालयानामनिशमुपयतांपद्धतिःपंक्तिरेवक्षोदोनक्षत्रराशेरुदयरयमिल
त्चक्रपिष्टस्यधूलिः॥हेषाक्रांदोहरीणांसुरशिखरिदरीःपूरयन्नेमिनादोयस्याव्यान्नी
त्रभानोःस्पंदिविभुर्वियथाव्यक्तचिक्कारथोवः॥६८॥एकाहेनैवदीर्घांत्रिभुवनपदवीं
लंघयन्योलघिष्ठःपृष्ठेमेरोर्गरीयान्दलितमणिदृषत्तीषपिंषन्नितांसि॥यःसर्व
स्योपरिष्टादथचपुनरधस्तादिवोल्लाघ्रिमूर्ध्नाभस्याव्यात्सएवंदुरधिगमपरिस्पं
दनःस्यंदनोवः॥६९॥निष्पंदानांविमानावलिविततदिवांदेववृंदारकाणांवृंदैरानं
दसांद्रोद्यममपिवहतांविंदतांवंदितुंनो॥मंदाकिन्याममंदःपुलिनभुविमृदुर्मंदिरे
मंदिराभेमंदारैर्मंडितारंदधदहरिदिनकृत्स्यंदनस्तान्मुदेवः॥७०॥चक्रीचक्रारपंक्तिं
हरिरपिचहरीन्धूर्जटिर्धूर्ध्वजांतानक्षान्नक्षत्रनाथोरुणमपिवरुणःकूवराग्रंकुबेरः॥

रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नो न्वहमहिमरुचेः
सो ऽवतात्स्यंदनो वः ॥७१॥ नेत्राहीनेन मूले विहितपरिकरः सिद्धसाध्यैर्मरुद्भिः पादोपां
ते युतो ऽलं वलिहरिरभसाकर्षणाबद्धवेगः ॥ भ्राम्यन्व्योमांवुराशावशिशिरकिरणस्यं
दनः संततं वो दिश्याल्लक्ष्मीमपारामतुलितमहिमैवापरो मंदराद्रिः ॥७२॥ यज्ज्यायो
वीजमह्नामपहततिमिरं चक्षुषामंजनं यद्द्वारं यन्मुक्तिभाजां यदखिलभुवनज्योति
षामेकमोकः ॥ यद्वृष्ट्यंभोनिधानं धरणिरससुधापानपात्रं महद्यद्दिश्याद्दीप्तांशुभा
सां तदविकलजगन्मंगलं मंडलं वः ॥७३॥ वेलावर्द्धिष्णुसिंधोः पय इव रवमिवाद्रौ ऽ प्रम:
ताग्र्यग्रहेतुस्तोकाक्लिन्नस्य चिह्नं समवमिव तमो धोरास्य मस्यन्महांसि ॥ प्रातः पूर्णांशु १२
भानि प्रत्रामयत्वग्निरः श्रोरवरीभूतमङ्कः पौरस्त्यस्याङ्गभाजि स्तिमितनमतमः खंडनं मंड

लंवः॥७४॥ प्रत्युप्तस्तम्भ हेमोज्वलरुचिरचलः पद्मरागेण येन ऽपायः किंजल्कपुंजंय
दलिकुलसितेरंवरेंदीवरस्य॥ कालव्यालस्य चिह्नं महिमतम महो मूर्द्ध्नि रत्नं महद्य
द्दीप्तांशोः प्रान्तरध्वान्त दीपकलजगन्मंडलं मंडलं वः॥७५॥ कस्मातानतारकाण्याप
तितत्तनुरवश्याय विंदु यथेंदु र्विशीर्णाहृङ्कस्मरारेरुरसिमधुरिपोः कौस्तुभोनो
द्भभस्तिः॥ वह्नेः सापहृवेववधुतिरुदस्तगत यत्र तन्मंडलं वोमार्तंडीयं धुनीतां द्विविभु
विवतमो सीव मुल्लसन्महांसि॥७६॥ यस्याव्योप्या कूचकास्ति प्रभवतिचयतः प्राप्य
सावुज्जिहानाह्निं हूमध्ये यदर्कोभवतितत रुचायेन चोत्पाद्यते हः॥ यत्पर्यायेणलो
कानवतिचजगतीं जीवितं यच्चतद्वो विश्वानुग्राहि विश्वंसृजदपिचरवेर्मंडलं मुक्तये
स्तु॥७७॥ शुष्यंत्यूठानुकारामकरवसतयोमारवीणांस्थलीनां येनोत्तप्ताः स्फुटंतः

13 स्त्वडितितिलतुलां यांत्यथेंद्राद्युगांते ॥ तच्चंडांशोरकांडत्रिभुवनदहनात्त्रांकयाधाम
कृच्छ्रात्संस्कृत्यालोकमात्रं प्रलघुविदधतस्तान्मुदे मंडलं वः ॥७८॥ उद्यद्धूधानवाप्यां
बहलतमतमःपंकपूरं विदार्य प्रोद्भिन्नेपत्रपार्श्वेष्वविरलमरुणच्छायया विस्फुरंत्या ॥
कल्याभिः क्रियाद्वः कमलमिव महन्मंडलं चंडभानोरन्वीतं तत्प्रहितोरसकृद्दलिकु
लाकाशिणाराद्भुणायत् ॥७२॥ वक्त्रे दक्षद्विषो यन्नतु दहति पुरः पूरयत्येव कामं
नास्तं जुहूंमहाद्भिर्यदि हनियमिनां यानपात्रं भवाब्धौ ॥ यद्भूतश्चांतिन्नाश्च भ्रमदपि
जगतां श्रांतिमश्रांतिरंतिब्रध्नस्याव्याद्विरुद्धक्रियमथ च हिताधायितन्मंडलं वः ॥८०॥
सिद्धैः सिद्धांतमिश्रं श्रितविधिविबुधैश्चारणैश्चाद्भुर्भगीत्या गंधर्वमुख्यैर्मुहुरहिप म२
तिभिर्यातुधानैर्यतात्मा ॥ मार्धं सांद्रैर्मुनींद्रैर्मुदिततममनोभाक्षिभीरक्षपातात्स्मातः १२

आरभ्यमाणस्तुतिरवातुरविर्विश्ववेद्योदयो वः॥ ९९॥ मासामामसन्नभावादधिकतरपु
टोऽप्यर्कवालस्यतापाछेदाहाछिन्नगाढतुरगखुरपुटन्यासनिःसंगरंकैः॥ निःसंगस्यं
दनांगभ्रमणनिकषणात्यातुवस्त्रिः प्रकारंतमोच्चुस्तपरीक्षापरइवपरितः पर्यटन्हा
टकाद्रेः॥ ८२॥ नोघुष्यंनाकनद्याविकसितकनकाम्भोरुहंश्राजितंतुप्रुष्टानैवोपभोग्या
भवतिभवात्तरंनंदनोद्यानलक्ष्मीः॥ नोम्हंगाणिद्रुतानिद्रुतममरगिरेःकालधौतानि
धौतानीदृग्धामद्युमार्गेत्र्यदयतिदशपायत्तसोर्कोवताद्वः॥ ८३॥ ध्वान्तस्यैवान्तहेतुर्न
भवतिमलिनैकात्मनःपाप्मनोपिप्राकूपारोपांतभाजांजनयतिनपरंपंकजानांप्रवो
धं॥ कर्तानिश्रेयसानामपितुनखलुयः केवलंवासराणांसोव्यादेकोद्यमेछाविहित
वङ्कृहहिहृष्यकार्यार्यमावः॥ ८४॥ लोलल्लोलावविचेष्टः श्रितत्त्वायनतलोनिःश्वसीभ्रतदे

हः संदेहीभाणितव्यसपदिहन्त्रादिन्त्राः प्रेक्षमाणोंधकाराः॥ निश्वासायासनिष्ठः परमपर
वन्नो जायते जीवलोकः शोकेनेवान्यलोकाभ्युदयकृतिगते यत्र सोकोविताद्र्ः॥ ८५॥
कामं लोकोपिलोकांस्तदुपकृतिकृतावाश्रितः स्थैर्यकोटिं न्दृणां दृष्टं विजित्संविदधद
पिकृतोल्पंतरत्वं तमर्थं॥ यस्तापस्यापि हेतुर्भवति नियमिनामेकनिर्वाणदायी क्ष्यात्स
भागवस्याधिकृतरपरिणामोदयोर्कः श्रियेवः॥ ८६॥ व्यापन्नतुर्नकालो व्यभिचरति
फलं नौषधिर्हृष्टिरिष्टानेष्टमल्पं तिदिवानहिवहतिमरुन्निर्मलाभानि भानि॥ आ
शाः शान्तानभिंदत्यवाधिमुदधयो विभ्रति क्ष्माभृतः क्ष्मां यस्मिंस्त्रैलोक्यमेवं न
वलति तपति मार्तण्डसूर्यः श्रियेवः॥ ८७॥ कैलासे कृत्तिवासा विहरति विरहत्रासदेहा
दकांतः शान्तः स्वांते महाहावधिजलधिविना छद्मना पद्मनाभः॥ योगोद्योगेकतानो १५

गमयति निखिलं वासरं स्वं स्वयंभूर्भर्त्रे लोक्यचिंताध्रृतिभुवनविभौ यत्र भास्वान्स वो
व्यात्॥ ८८॥ एतद्यन्मंडलं खे तपति दिनकृतस्ता ऋचोर्चींषि यानि द्योतंते तानि सामा
न्ययमपि पुरुषो मंडलेंतर्यजूंषि॥ एवं यं वेद वेदत्रितयमयमयं वेदवेदी समग्रो वर्गः
स्वर्गापवर्गप्रकृतिरविकृतिः सोस्तु सूर्यः श्रियेवः॥ ८९॥ नाकौकः प्रत्यनीकक्षतिप
टुमहसां वासवाग्रेसराणां सर्वेषां साधकानां जगदिदमदितेरात्मजत्वे समेपि॥ ये
नादित्याभिधानं निरतिशयगुणैरात्मनि न्यस्तमस्तु न्यस्त्रैलोक्यवंद्यस्त्रिदश
मुनिगणैः सोंशुमान्श्रेयसे वः॥ ९०॥ भूमिं धाम्नोभिवृष्ट्या जगति जलमयीं पावनीं
संस्मृतावप्याग्नेयीं दाहशक्त्या मुहुरपि यजमानां यथा प्रार्थितार्थैः॥ लीनामाका
शएवामृतकरघटितां ध्वांतपक्षस्य पर्वण्येवं सूर्योष्टमूर्तिर्भवइव भवतः पातु बि

15

यक्त्वमूर्त्तिः ॥२१॥ आकालोत्थितपद्माकरपरिमिलनाविर्भवत्पाददस्रौ भौमत्वात्यक्तोरू
स्वेदाङ्कृतिर्दिविक्किन्नतास्तनुनानीयमानः ॥ सप्ताश्वाप्तापरान्तान्यधिकमभरयन्योजगं
तिस्फुतोलंदेवैर्देवःसपायादपरइवमुरारातिरक्रांघ्रिपतिर्वः ॥२२॥ यःस्रष्टापांपुरस्ता
दचलवरसमभ्युन्नतेर्हेतुरेको लोकानां यस्त्रयाणांस्थितउपरिपरंदुर्विलंघ्येनधाम्ना ॥
सद्यःसिध्येप्रसन्नद्युतिशुभ्रचतुरस्त्रा[illegible]मुखस्त्रा[illegible]भको द्वधाविधाइवाविःकृत
कमलरुचिःसोर्चिषामाकरोवः ॥२३॥ माद्विष्टूर्वीनिरीक्षा दिक्षातिदस्राद्विस्त्रोदर्शयन्
प्रागृहृशोयःसादस्त्रंपदस्त्रपतोनोसदस्त्राशातहृविश्चैदस्त्रौयस्यदैत्रौ ॥ दीप्तांशुर्वःसहि
श्याददिश्वियुगदस्त्रादान्नीतद्वादस्त्रात्मातंत्रास्त्यश्वांश्चयस्पात्रायविदतित्रायाद्
दस्त्रस्कान्नानाद्यः ॥२४॥ तीर्थानिव्यर्थकानिहृदनदसरसीनिर्झरांभोजिनीनांनो ९५

ध्वंतोनुदंति प्रतिभयमसुसंभवभूपातानुवंधी ॥ आपो नाकापगाया अपि कलुष
मुषो मज्जतां नैवयत्रात्तु यातेन्यलोकान्सद्दिव्रातु दिवसस्यैकहेतुर्हितं वः ॥ २५ ॥
एतत्पातालपंकप्लुतमिव तमसैवैकमुग्रं तमासीदप्रज्ञानाप्रतर्क्यं निरवगतित
थालक्षणं सुप्तमंतः ॥ यादृक्सृष्टेः पुरस्तान्निशि निशि निखिलं जायते तादृगेव त्रै
गा लोक्यं यद्धियोदेव तु रविरसौ सर्गतुल्योदयो वः ॥ २६ ॥ दीपे योस्ताचलेस्मिन्भवति रव
लुस एवापरत्रोदयाद्रिर्याया मित्युज्वलेंदुर्द्युतिरिह दिवसोन्यत्र तीव्रातपः सः ॥ यद्वद्यो
देशकालावितिनियमयतो नो तु यं देशकालावव्याप्तस्य प्रभुत्वाहितभुवनहितो हे
तुरर्क्काम्निनो वः ॥ २७ ॥ व्यग्रेरत्यग्रहेंदुग्रसनगुरुभरैर्नैमिमग्रे रुदग्रैः अत्यग्रैरीषदु
ग्रेरुदयगिरिगतो गोगणैर्गौरयन्गां ॥ उज्झन्दार्चिर्निलीनामरनगरनगभग्रावगर्भा

का ०

सू. श. मिथाक्क्रामसेश्रेयोविधत्तेग्लपयतुगहनंसं... ग्रामणीर्वः॥ ९८॥ योनिः साम्नांविधा
१६ तामुधुरिपुरजितोधूर्जटिःशंकरोसौमृत्युःकालोऽथकायाःपतिरपिधनदःपावको
ज्ञातवेदाः॥ इत्थंसंज्ञादविस्यादिवदमृतभुजांयापदछायहन्तास्तासामेकोऽभिधे
16 यस्तदनुगुणगुणैर्यःससूर्योवताद्वः॥ ९९॥ देवःकिंबांधवःस्यात्प्रियसुहृदथवा
चार्यआहोस्विदर्योरक्षाचक्षुर्नुदीपोगुरुरुतजनकोजीवितंवीजमोजः॥ एवंनि
र्णीयतेयःकइतिनजगतःसर्वदासर्वदोसौसर्वाकारोपकारीदिशतुदशशता १६
शीशुरभ्यर्थितंवः॥ १००॥ इतिश्रीमयूरकविविरचितंसूर्यशतकंसमाप्तिमगमत्